**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 6
ISSN : 2581-6306
doi : https://doi.org/10.32628/SHISRRJ

# सांख्यकर्मज्ञानयोगनयेषु प्रतिफलितनैतिकभावना

खोकनदासः
शोधछात्रः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः।

**Article Info**

**Publication Issue :**
November-December-2023
Volume 6, Issue 6

**Page Number :** 41-51

**Article History**
Received : 01 Nov 2023
Published : 05 Nov 2023

**सारसंक्षेपः-** नी-प्रापने अथवा नी-नये इति धातोः क्तिन् प्रत्यये नीतिशब्दः निष्पद्यते। शब्दोऽयं Ethos इति ग्रिक्-शब्दात् उद्धृतः। Ethos इत्यस्य अर्थः जातेः समाजविशेषस्य वा विशिष्टनीतितत्त्वम् नैतिकपरिवेशः वा। विविधकोशग्रन्थेषु नीतिशब्दस्य वहुविधोऽर्थोल्लिखितः। यथा-निर्देशनम्, प्रवन्धः, नीतिकौशलम्, व्यवहारकुशलता इत्यादयः। एतदर्थेभ्यः अवगन्तुं शक्यते यत्-नीतिशास्त्रं भवति सर्वविधप्रयोजनस्य सिद्धिदाता तथा सर्वार्थसाधकम्। एतत्प्रसङ्गे भर्तृहरिनोक्तम्- 'सर्वस्य लोचनं शास्त्रं नीतिविद्यां ददाति च' (नीतिशतकम्) । अर्थात् समये क्रार्ये च व्यवहृता नीतिः द्रुतमेव साफल्यं प्रयच्छति। प्रायशः सर्वविधशास्त्रेषु एव नीतिबोधस्य प्रयोगः अर्थात् प्रतिफलनं दरीदृश्यते। अर्थात् वैदिक-पौराणिक-काव्यादिसाहित्येषु नीतिविषयकमालोचनं समुपलभ्यते। अतः मया सांख्यकर्मज्ञानयोगनयेषु प्रतिफलितनैतिकभावना इति शीर्षकमाश्रित्य कथं श्रीमद्भगवद्गीतायां तद्विचारः विहितः इति स्वल्पमतिना मया शोधलेखोऽयं विलिख्यते।

**कुञ्चिकाशब्दाः-** नीतिः, श्रीमद्भागवद्गीता, श्रीकृष्णः, धर्मः, अधर्मः, दुःखम्, संसारः।

**भूमिका-** नी-प्रापने अथवा नी-नये इति धातोः क्तिन् प्रत्यये नीतिशब्दः निष्पद्यते। शब्दोऽयं Ethos इति ग्रिक्-शब्दात् उद्धृतः। Ethos इत्यस्य अर्थः जातेः समाजविशेषस्य वा विशिष्टनीतितत्त्वम् नैतिकपरिवेशः वा। विविधकोशग्रन्थेषु नीतिशब्दस्य वहुविधोऽर्थोल्लिखितः। यथा- निर्देशनम्, प्रवन्धः, नीतिकौशलम्, व्यवहारकुशलता इत्यादयः। एतदर्थेभ्यः अवगन्तुं शक्यते यत्- नीतिशास्त्रं भवति सर्वविधप्रयोजनस्य सिद्धिदाता तथा सर्वार्थसाधकम्। एतत्प्रसङ्गे भर्तृहरिनोक्तम् - 'सर्वस्य लोचनं शास्त्रं नीतिविद्यां ददाति च' (नीतिशतकम्) । अर्थात् समये क्रार्ये च व्यवहृता नीतिः द्रुतमेव साफल्यं प्रयच्छति।

प्रायशः सर्वविधशास्त्रेषु एव नीतिबोधस्य प्रयोगः अर्थात् प्रतिफलनं दरीदृश्यते। अर्थात् वैदिक-पौराणिक-काव्यादिसाहित्येषु नीतिविषयकमालोचनं समुपलभ्यते। परन्तु पुस्तकरूपेण विलिखितः प्रथमो नीतिग्रन्थो भवति चाणक्यरचितं 'चाणक्यशतकम्,' एतद्व्यतिरिच्य 'कामन्दकीयनीतिसारः' इत्यादयः वहुग्रन्थाः सन्ति।श्रीमद्भगवद्गीता तादृशो धर्मग्रन्थः यत्र अखिलोपनिषदः सारः वर्तते। गीतायाः माहात्म्यरूपेण वक्तुं शक्यते यत् -

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः।**[i]
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥**

शोधपत्रेऽस्मिन् श्रीमद्भागवद्गीतायां या नैतिकभावना परिलक्षिता प्रतिफलिता वा तत्प्रसङ्गे आलोच्यते -

**सांख्ययोगे प्रतिफलिता नैतिकभावना-** अस्मिन्नध्याये श्रीकृष्णः कौन्तेयमर्जुनं वोधयितुमिच्छति यत् जडदेहोऽनित्यः आत्मा च नित्यः । अतः जडदेहः आत्मवत् न प्रयोजनीयः। आत्मैव जीवस्य प्रकृतसत्ता। देहविनाशस्य भयात् शोकप्रकाशनम् नितान्तमेव निरर्थकम्। प्रकृतज्ञानी कदापि जडदेहकृते शोकं न प्रकाशयति। एतद्विषये उक्तम्-

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

**"अशोच्यानन्वशोचस्त्वं प्रज्ञावादांश्च भाषसे।**[ii]
**गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः ।।"**

अनेनेयमेव नैतिकशिक्षा प्रकाश्यते सदैव नित्यस्य श्रेयसः वा वस्तुनः ग्रहणमनुसन्धानं वा कुर्यात्। एतत्व्यतिरिक्तं भगवत्श्रीकृष्णेन सर्वे प्राणिनः निष्कामकर्मणे उपदिश्यते –

**"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।**[iii]
**मा कर्मफलहेतुर्भूमा ते सङ्गोऽस्त्वकर्मणि।।"**

अतिसहनीये शीतोष्णे केनापि प्रकारेण सोढुं न शक्येते। यदि केनापि इदं सह्यते तदा तस्य विनाशः अवश्यमेव। अत्र उच्यते यत् तत्त्वाभिज्ञजनैरेव इदं द्वन्द्वात्मकमसहनीयं सहितुं शक्यते। प्रसङ्गेऽस्मिन् भगवता श्रीकृष्णेनोक्तं यत् –

**"नासतोविद्यते भावो नाभावो विद्यते सतः।**[iv]
**उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः।। "**

उपरोक्तश्लोकमाध्यमेन इदं नैतिकं चिन्तनमायाति यत्–आत्मानात्मनयोः भेदज्ञानसदृशमखिलं द्वन्द्वं सहेरन्। अनया सहनशक्त्यैव मनुष्याः स्वलक्ष्यमाप्तुं समर्थाः भवन्ति। यतो हि सहनशीलता एव लक्ष्यपूरणस्य मुख्यकुञ्चिकेति नास्ति तत्र संशयः।

एवञ्च एतदपि वक्तुं शक्यते यत् मनुष्याः कामनावासनाभ्यां आकर्षिताः मोहिताश्च भवन्ति। कामनादयः मनुष्यैः उपेक्ष्यन्ते चेत् तेषु मनुष्येषु शान्तिरुदेति। अतः श्रीकृष्णेनोक्तं –

**"विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः।**[v]
**निर्ममो निरहङ्कारः स शान्तिमधिगच्छति।। "**

अनेन इदवगतं यत् जगत्यिस्मिन् मानवाः सदा अर्थाभिमुखिनः भवन्ति। ते मानवाः इमां वासनां त्यजेयुः। यतो हि अर्थे एव अनर्थो विहितोऽस्ति। एतेन अर्थेन अनर्थः जायते। तैः मनुष्यैः परहिताय अर्थोऽ व्ययितव्यम्।

**कर्मयोगे प्रतिफलिता नैतिकभावना-** गीतायां मनुष्यानां कीदृशं कर्म करणीयमकरणीयं वा तद्विषये उपदिष्टम्। एतद्व्यतिरिच्य समाजे श्रेष्ठसाधनमानवयोर्मध्ये यः आचरणगतो भेदोऽस्ति तद्विषये उक्तम् –

**"यद् यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।**[vi]
**स यद् प्रमाणं कुरुते लोकस्तदनुवर्तते।।"**

अनेनेयमेव नैतिकभावना प्रकाश्यते यत् महाजनो यत् मार्गं गच्छति साधारणजनः तत् अनुसरति । अर्थात् महाजनो येन गतः स पन्थाः। स्वधर्मश्रेष्ठत्वप्रसङ्गे भगवता निगदितम्–

**"स्वधर्मे निधनं श्रेयः परधर्मो भयावहः।"**[vii]

अस्मिन् जगति ईश्वरोपासनां विहाय अन्येषु कर्मसु मनुष्याः नियुक्ताः भवन्ति। तैः कर्मभिः ते आबद्धाः सन्ति। यदि तैः ईश्वरोपासना विधीयते तदा तेषु कर्मबन्धनं नायाति। अस्यामवस्थायां श्रीकृष्ण उवाच –

**"यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।**[viii]
**तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर।। "**

अत्र नैतिकभावनायाः परिचयः लभ्यते यत् जगति विद्यमानोऽखिलोऽर्थः परहिताय यज्ञस्वरूपः। अतः पण्डिताः एतादृशस्य अर्थस्य विनियोगः दानकर्मणि परहितकर्मणि च कुर्युः। प्राप्तार्थस्य दानकरणमेव पण्डितानाम् उत्कृष्टं कर्म। किन्तु अर्थस्य अतिभोगः अतिसञ्चयनञ्चेति सर्वैः निन्द्यते। अतः उच्यते सर्वैः मनुष्यैः परकल्याणायैव धनव्ययः क्रियेत।

पुनः गीतां विवृतं यत् अर्थपिपासवः जनाः असहनीयं कष्टमपि सोढुं शक्नुवन्ति। एतदर्थमेव ते यत्किमपि कार्यं साधयितुं उद्योगिनः भवन्ति। किन्तु ते न जानन्ति यत् अयमेव अर्थः दुःखकारणम्। अस्य अर्थरूपकामनायाः स्वरूपविषये भगवता आदिष्टं यत् –

**"काम एष क्रोध एषरजोगुणसमुद्भवः।**[ix]
**महाशनो महापाप्मा विद्धयेनमिह वैरिणम्।। "**
**"आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा।** [x]
**कामरूपेण कौन्तेय दुष्पूरेणानलेन च।। "**

अर्थकामनायाः विनाशनमेव अखिलदुःखानामखिलकष्टानाञ्च मुक्तिकारणम् इति ज्ञातुं शक्यते। एतादृश्यामवस्थायां मनुष्याः सुखेन स्थातुमर्हन्ति। निर्धनाः सन्तः इतरेषां सकाशे निकृष्टाश्चेदपि मानसिकरूपेण परमशान्तावस्थायां स्थास्यन्ति। अतः सर्वैः मनुष्यैः इदं भाव्यं यत् सांसारिकभोगवासनायां वैराग्यं सम्पाद्य जनाः सुखादिभावपूर्वकं प्राणिणः प्रति सदयभावं प्रदर्शयेयुः।

**ज्ञानयोगे प्रतिफलिता नैतिकभावना-** ज्ञानयोगे ज्ञानसम्पर्कितनैतिकभावना प्राप्यते। यथा श्रीकृष्णेन कथितम्- यो जनं तं परमात्मानमभिज्ञातुं शक्नोति स कर्मणा न वध्यते। अर्थात् तेनात्मज्ञानं लभ्यते। कर्मणः अनावृतत्त्वात् मोक्षः जातः। यथा उक्तम्–

**"न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा।**[xi]

इति मां योऽभिजानाति कर्मभिर्न बध्यते।।"

अनेनेयमेव नैतिकशिक्षा प्रदीयते यत् मोक्षप्राप्त्यर्थमथवा भवचक्रविनाशाय आत्मज्ञानं लभनीयमिति।

'जातस्य हि ध्रुवो मृत्युः'[xii]– यद्यपि जातमात्रस्य मरणं निश्चितं तथापि जीवत्कालं नैतिकव्यवहारेण निर्वाहणं करणीयम्। नीतिज्ञानं गुरुरूपेण मनुष्यं परिपालयति। अतः नीतिज्ञानं विना मनुष्यजीवनं निरर्थकम्।

एवमेव अन्ये वहवः नीतिज्ञानानि समग्रगीतायां प्राप्यते । परन्तु अत्र शोधपत्रमित्यस्य निर्दिष्टसंख्याहेतुः समग्रनीतिशिक्षायाः आलोचना मया न कृता ।

समाजे धर्माधर्मौ सदैव विद्येते। अनयोः मध्ये धर्म एव बलवान्। अधर्मः यावति उच्चशिखरे तिष्ठतु नाम तस्य विनाशः नित्यः। अधर्मगतिः धर्मपेक्षया सर्वदैव निम्नाभिमुखिनी। पुनस्तु अधर्मगतेः क्रमवर्धमानावस्थायां तस्य विनाशरूपावस्थायाः प्रसङ्गः श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेनोक्तम् –

**"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।**[xiii]
**अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।। "**
**"परित्राणाय साधूनां विनाशाय च दुष्कृताम्।**[xiv]
**धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।। "**

अनेन ज्ञायते यत् धर्ममार्गे न्यायमार्गे वेति गमनकर्ता सर्वान् दुःखान् क्लेशान् च विनाशयित्वा स्वगन्तव्यं प्राप्नोति। साधारणजनाः कामनया तावन्तः निमज्जिताः भवन्ति यदा तैः बोद्धुं न शक्यते यत् ते धर्ममार्गे सन्ति उत अधर्मे। अस्माभिः ज्ञायते यत् अधर्मगतिः यावच्छीघ्रं वर्धते तस्य तावच्छीघ्रकालेन विनाशः सम्भवति। अतः अधर्मं परित्यज्य धर्मः एव उपासनीयः। पुनस्तु समाजे बहवः बहुज्ञानाधिकारिणः वर्तन्ते येषु ज्ञानाहंकारः विद्यते। प्रसङ्गेऽस्मिन् भर्तृहरिणा नीतिश्लोके उक्तम्

**"यदा किञ्चिज्ज्ञोऽहं द्विपःइव मदान्धः समभवम्**
**तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तम् मम मनः।। "**[xv]

यथा प्रज्वलिताग्निः काष्ठानि बभस्ति तथैव आत्मज्ञानरूपाग्निः प्रारब्धकर्मफलं विहाय अन्यानि कर्माणि दाहयति। प्रसङ्गेऽस्मिन् भगवता श्रीकृष्णेनोक्तम् –

**"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन।** [xvi]
**ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा।। "**

अस्माद् श्लोकाद् ज्ञायते यत् अहंकारः एव ज्ञानादग्धजनस्य विनाशहेतुः। एतद्धेतोः सः सर्वविकासात् वञ्चितो भवति। अतः नीतिशतके अस्ति –

**"अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः।** [xvii]
**ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति।। "**

अतः सर्वे ज्ञानिनः निरहङ्काराः भवेयुः। यतो हि अयमेव अहंकारः ज्ञानवतां मर्यादादीनां पतनस्य मुख्यं कारणम्। अतः सर्वैः जनैः अहंभावः परित्यक्तव्यः। पुनश्च भगवता मनुना मनुस्मृतेः पञ्चमाध्याये उक्तम् –

**"यो अहिंसकानि भूतानि हिनस्त्यात्म सुखेच्छया।**[xviii]
**स जीवंश्च मृतश्चैव न क्वचिद् सुखमेधते।। "**

अनेन विदितं यत् सर्वे जागतिकाः मनुष्याः सुखमेव अभिलषन्ति। किन्तु अस्मिन् सुखलाभे हिंसाभावः न भवेत्। तथापि मानवाः भौतिकसुखार्थं प्राणिनः घ्नन्ति इति तु दरीदृश्यते। किन्तु ते कदापि इहपारलोकयोः शान्तिं नाप्नुवन्ति। अतः प्राणीहननं सर्वैः त्यजनीयम्।

एवञ्च आचार्यः भर्तृहरिः नीतिशतके नैतिकभावनायाः परिचयमकरोत्। यथा –

**"आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**[xix]
**नास्त्युद्यम समो बन्धः मत् कृत्वा नावसीदित॥ "**

अनेन आलोचनेन बहूनि तत्त्वानि उपस्थितानि सन्ति, यथा – श्रेयवस्तु प्रति आग्रहः, आत्मानात्मनयोः भेदज्ञानं, धनविषये अनाग्रहः, धर्मन्याययोः चर्चा, अहंकारस्य त्यागः, श्रेयपुरुषस्य सान्निध्यलाभः, परहिताय धनव्ययः, सांसारिकविषये वैराग्यभावश्चेति। अतएव एतस्माद् आलोचनात् येः नैतिकविषयाः समुपलभ्यन्ते ते सर्वे अस्माकं जीवने अत्यावश्यकाः सन्ति। यदि मनुष्याः एतान् विषयान् जागरूकतया परिपश्यन्ति तदा सर्वे उत्कृष्टरूपेण स्वजीवनं यापयितुं शक्नुवन्ति।

**"दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने**[xx]
**प्रीतिः साधुजने नयो नृपजने विद्वज्जनेऽप्यार्जवम्।**
**शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता**
**ये चैवं पुरुषाः कलासु कुशलास्तेष्वेव लोकस्थितिः॥"**

**अन्तटीप्पणी-**

---

[i].श्रीमद्भगवद्गीता– 8/14

[ii].श्रीमद्भगवद्गीता– 2/11

[iii].श्रीमद्भगवद्गीता– 2/47

[iv].श्रीमद्भगवद्गीता– 2/16

[v].श्रीमद्भगवद्गीता–5/71

[vi].श्रीमद्भगवद्गीता– 3/21

[vii].श्रीमद्भगवद्गीता–3/35

[viii].श्रीमद्भगवद्गीता–3/9

[ix].श्रीमद्भगवद्गीता–3/37

[x].श्रीमद्भगवद्गीता– 3/39

[xi].श्रीमद्भगवद्गीता– 4/14

[xii].श्रीमद्भगवद्गीता –2/27

[xiii].श्रीमद्भगवद्गीता–4/7

[xiv].श्रीमद्भगवद्गीता– 4/8

[xv].नीतिशतकम्–श्लोकः – 8

[xvi].श्रीमद्भगवद्गीता–4/37

[xvii].नीतिशतकम्–शलोकः3

[xviii].मनुस्मृतिः– 5/45

[xix].नीतिशतकम्–धैर्यपद्धतिः, श्लोकः86

xx.नीतिशतकम्–22

**सन्दर्भग्रन्थसूची**


1. श्रीमद्भगवद्गीता, स्वामी भावघनानन्द, उद्बोधन कार्यालयः, कलकाता,2000
2. महाभारतम्, भारतीय संस्कृति के नैतिक मुल्य, जगतनारारायण दुबे,सञ्जय प्रकाशन, दिल्ली, 1999
3. श्रीमद्भगवद्गीता यथायथ, स्वामी प्रभुपादः, भक्तिवेदान्त वुकट्राष्ठ, मुम्वइ,2016
4. गीता रसामृत गीताप्रेश, गोरक्षपुर,2013
5. श्रीमद्भगवद्गीता, स्वामी वासुदेवानन्दः, उद्बोधन कार्यालयः, कलकाता,2000
6. यथार्थगीता,स्वामी श्री अरगरानन्दजी,श्री परमहंस स्वामी अरगरानन्दजी आश्रम ट्रास्ट, मुम्वइ, 2003
7. वर्तमान जीवन मे गीती का महत्त्व,  ड.आर.सि.गुप्त, पि.एस. पब्लिकेशन, भोपाल,1988
8. श्रीमद्भगवद्गीता मूलकथा, ड. राहुल राज, स्टैण्डर्स पब्लिशर्स,निउ दिल्ली,2005
9. नीतिशतकम्, ड. उदयचन्द्र–वन्द्योपाध्यायः,संस्कृत वुक डिपो,कलकाता,2018
10. नीति–शृङ्गार–वैराग्य शतकत्रय,ड.चमनलाल–गौतम,संस्कृति–संस्थान,बरेलि,1974
11. मनुसंहिता,ड.मानवेन्दुवन्द्योपाध्यायशास्त्री,संस्कृतपुस्तकभाण्डारः,कलकाता,1410